International Journal of Sanskrit Research 2021; 7(1): 489-493

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 489-493
© 2021 IJSR
www.anantaajournal.com
Received: 16-11-2020
Accepted: 02-01-2021

**उत्तम-माझिः**
शोधछात्रः,संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

Corresponding Author:
**उत्तम-माझिः**
शोधछात्रः,संस्कृत-पालि-प्राकृत-विभागः, भाषाभवनम्, विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

# ऋकारऌवर्णयोः सवर्णविधिविमर्शः

**उत्तम-माझिः**

**संक्षिप्तसारः**

आचार्यः पाणिनिमतानुसारे "तुल्यास्यप्रयत्नं सवर्णम्"(१/१/९) सूत्रानुसारे तुल्यौ स्थानप्रयत्नौ यस्य तदक्षरं मिथः सवर्णसंज्ञा स्यात्। यथा- 'दण्डाग्रम्', 'दैत्यारिः' अत्र द्वयोरकारयोरेकोदीर्घ आकारः, स्थानसाम्यात्। परन्तु ऋऌवर्णयोर्मूर्धादन्तात्मकभिन्नस्थानकत्वात् सवर्णसंज्ञा न भवति। माहेश्वरसूत्रेऽपि 'ऋऌ' इति पृथगुपदेशः कृतः। परन्तु वार्तिककारेण वार्तिकं कृतम्-"ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्।" अतः "ऋत्यकः"(अ.६/१/१२८) इत्यनेन वैकल्पिके ह्रस्वे अकारे प्रकृतिभावे च 'खट्वऋर्ष्यः', 'मालऋर्ष्यः' इत्येकं रूपं भवति। यदा सवर्ण्याद् ऌवर्णस्य ग्रहणम्, तदा 'खट्वा + ऌर्ष्यः', 'माला + ऌर्ष्यः' इति स्थिते "ऋत्यकः"(अ.६/१/१२८) इत्यनेन वैकल्पिके ह्रस्वे अकारे प्रकृतिभावे च 'खट्वऌर्ष्यः', 'मालऌर्ष्यः' इत्येकं रूपमपि भवति। परन्तु सर्वत्र ऋकारेण ऌकारग्रहणं सन्निहितं न भवति। यथा 'कॢ३प्तशिखः' इत्यत्र "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्"(अ.८/२/८६) इत्यनेन प्लुतो भवति, अत्र 'अनृतः' इति पदेन प्लुतो निषेधः कथं न भवति ? अपि च ऌकारेण ऋकारग्रहणं न भवति- "पुषादिद्युताद्यॢदितः परस्मैपदेषु"(अ.३/१५५) सूत्रस्य ज्ञापकात्। प्रभृतिविषयाणामुपरि विश्लेषणात्मकमध्ययनमस्य शोधप्रबन्धस्य प्रमुखोद्देश्यः।

**प्रमुखशब्दाः** - सवर्णसंज्ञा, तुल्यः, आस्यम्, प्रयत्नः, वार्तिकम्, ॠॄ, ऌॡ, रप्रत्याहारः, प्लुतः

## प्रस्तावना

पाणिनिमुनिना प्रणीतस्याष्टाध्यायीग्रन्थे "*तुल्यास्यप्रयत्नं सवर्णम्*"(अ.१/१/९) इति सूत्रं कृतम्। अनेन सूत्रेण सवर्णसंज्ञा कृता। सूत्रार्थो भवति- तुल्य[1] आस्ये[2] प्रयत्नो[3] यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति। यथा- 'दण्डाग्रम्', 'दैत्यारिः' इत्यत्र 'दण्ड + अग्रम्', 'दैत्य + अरिः' इति स्थिते द्वयोरकारयोरेकोदीर्घ आकारः, स्थानसाम्यात् । ऋऌवर्णयोर्मूर्धादन्तात्मकभिन्नस्थानकत्वात् सवर्णसंज्ञा न भवति।

---

[1] 'तुल्य' शब्दः सदृशपर्यायः(काशिका,अ.१/१/९)।

[2] आस्यं मुखम्,तत्साम्यस्य सर्ववर्णेष्वविशिष्टत्वादव्यावर्तकत्वादास्यशब्देऽत्र न मुखमात्रपरः, किन्तु आस्ये मुखे भवमास्यं ताल्वादिस्थानम्।(*बालमनोरमा*, अ.१/१/९)।

[3] प्रकृष्टो यत्नः प्रयत्नः।(*बालमनोरमा*, अ.१/१/९)।

परन्तु 'होतृ + ऌकारः' इत्यस्मिन् उदाहरणे ऋकारऌवर्णयोः सवर्णसंज्ञा स्वीकृत्वा *"अकः सवर्णे दीर्घः"*(६/१/११०) इत्यनेन दीर्घे ॠकारे 'होतॄकारः' इति रूपं सिध्यति। पाणिनिमुनिना अस्मिन् विषये नियमो न कृतः। पाणिनीयव्याकरणस्य [4] उक्तानुक्तदुरुक्तार्थचिन्ताप्रकाशाय वार्तिककारकात्यायनेन उक्तं यत्- *"ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या "*[5]। भट्टोजिदीक्षितेन तदीयवृत्तौ वार्तिकस्य अर्थतः संगृह्य उक्तं यत्-'*ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्* ।" [6] एतद्विषये सन्देहनिरसनार्थं विश्लेषणात्मकमध्ययनं सम्यकतया उपस्थाप्यते।

भाष्यकारेण उक्तं यत्- *"ऋकारऌकारयोः सवर्णसंज्ञा विधेया। होतॢकारः होतॄकारः इति किं प्रयोजनम्? अकः सवर्णे दीर्घः' दीर्घत्वं यथा स्यात्"* [7] अर्थात् 'होतॄकारः' (होतृ + ऌकारः) इत्यस्मिन् स्थाने सवर्णदीर्घत्वविधाय ऋकारऌकारयोः सवर्णसंज्ञायाः प्रयोजनं कथम् ? यतः *"ऋति ॠ वा वचनम्, ऌति ऌ वा वचनम्"*[8] इत्यत्र 'वा' शब्दसमुच्चयार्थः। अतः वार्तिकस्य अर्थो भवति- अकः सवर्णे ऌकारे परे पूर्वपरयोः दीर्घ एकादेशः स्यात्, तथा च वैकल्पिके पूर्वपरयोः ऌकारो भवति। अतः ऌवर्णस्य दीर्घाभावादृवर्णस्य अन्तरतमो दीर्घ ॠकारो भविष्यति[9]। अतः 'होतॄकारः,' 'होतॢकारः' इति पदद्वयं भवति। यदि केवलमग्मात्रस्य कार्यं भवति, तर्हि 'दध्यॢकारः', 'मध्वॢकारः' इत्यस्मिन् स्थाने वैकल्पिके ऌकारस्यैव एकादेशे प्रयोगे प्रसक्तिर्भवति। तर्हि *"ऋति ॠ वा वचनम्, ऌति ऌ वा वचनम्"*[10] अत्र न केवलमग्मात्रस्य कार्यम्। अपि तु सवर्णसंज्ञक ऋकारऌकारश्च परे दीर्घ एकादेश ऌकार एकादेशश्च वा। अतः ऋकारऌकारयोः सवर्णसंज्ञा विधेया[11]। पदमञ्जरीकारेण उक्तं यत्- *"तत्र ऋति ॠ वा वचनमित्यत्र वा शब्दो दीर्घस्य समुच्चयार्थः, तेनाप्राप्त एव दीर्घो भविष्यति। ननु यद्यविधायैव सवर्णसंज्ञां तदुच्यते, ततोऽक इति सम्बन्धादङ्गात्रस्य ऌति तत् कार्यं स्याद् दध्यॢकारो मध्वॢकार इति तस्यैव व्यवस्थितं भवति तस्माद्विधेया सवर्णसंज्ञा।"*[12]

अतः पुन आशङ्का भवति। यदा ऋकारऌकारयोः सवर्णविधिः कृता तदा *"ऋति ॠ वा वचनम्"*[13] अत्र 'ऋति' इति सप्तम्यन्तं पदं तच्च पञ्चम्यन्ततया विपरिणम्यते। तदन्तरं 'ऌति' इति वक्तव्यम्, तर्हि ऌति रूपद्वयं सिद्धम्[14]। एतद्विषये तुलनीयम्- *"यदेतद् ऋतीति 'एतद्दत इति वक्तव्यम्, सवर्ण इत्येव ऋकारस्य ऋकार एव सवर्णः' इति ऋत्येव भविष्यति। तत ऌति, ऋत इत्येव। इदं चासवर्णार्थम्, तेन ऌति रूपद्वयं सिद्धम्-* होतॄकारः, *होतॢकार इति"*[15]। परन्तु यदा ऋकारऌकारयोः सवर्णसंज्ञा विधेया तदा *"ऌति ऌ वा वचनम्"*[16] इति वार्तिकस्य प्रयोजनं कथम्, *"अवश्यं तद् वक्तव्यम्। ऊकालोऽज्झ्रस्वदीर्घप्लुतसंज्ञो भवतीत्युच्यते। न च ॠकार ॡकारो वाऽजस्ति"*[17] इत्युक्तम्। रेफद्वयघटित ॠकारः, लद्वयघटितॡकार इति च सूचितम्। *प्रदीपटीकायामुक्त यत्- "द्वावप्येतौ दीर्घौ 'ॠ ॡ' इति ॠकारे कदाचित् 'ॠ' इति दीर्घः कदाचित् ॠ। ॡकारेऽपि 'ॠ' 'ॡ' इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः ।"* [18] वार्तिकविधेय ॠकार ॡकारश्च द्विमात्रकमेवेति सूचितम्- *"अकां सवर्णे ऋति परतो वा ॠ (ॠ) भवति; द्विमात्रोऽयम्, मध्ये द्वौरेफौ तयोरेका मात्रा; अभितोऽज्भक्तेरपरा, ईषत्स्पृष्टश्चायम्। तत्र प्रयत्नभेदादृकारेणाग्रहणाद् अनण्त्वाद्दीर्घसंज्ञाया अभावादप्राप्तोऽयं विधीयते। ऌति ॡ वा वचनमित्ययमपि द्विमात्र ईषत्स्पृष्टश्च मध्ये द्वौ लकारौ, तयोरेका मात्रा, अभितोऽज्भक्तेरपरा। पूर्ववदप्राप्तो विधीयते"*[19] *सिद्धान्तकौमुदी*कारेण अपि एवमुक्तं यत्- *"ऋति ॠ वा, ॡति ॡ वा' इत्युभयत्रापि विधेयं द्वयं द्विमात्रम्। आद्यस्य मध्ये द्वौ रेफौ, तयोरेका मात्रा। अभितोऽज्भक्तेरपरा। द्वितीयस्य तु मध्ये द्वौ लकारौ, शेषं प्राग्वत्"*। [20]

अतोऽत्र ऋकारऌकारयोः सवर्णसंज्ञा न कर्तव्या। अनेन कारणेन ऌकारेस्य, ऌकारेण ऋकारस्य ग्रहणं न भवति। अतः *"ऋति ॠ*

---

[4] उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्त्तते।
तं ग्रन्थं वार्तिकं प्राहुर्वार्त्तिकज्ञा मनीषिणः।।(पराशरोपपुराणम्)

[5] *वार्तिकम्, काशिका, अ.* १/१/९।

[6] *वार्तिकम्, वैयाकरणसिद्धान्तकौमुदी,* अ.८/२/१।

[7] *व्याकरणमहाभाष्यम्,* अ.१/१/९।

[8] *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.१/१/९।

[9] 'तत्र ऌवा वचनम्' इत्यत्र दीर्घ इत्यनुवर्तते। तत्र ऌति ऌशब्दे विकल्पितेऽप्राप्त एव पक्षे दीर्घो भविष्यति। स च भवन् ऌवर्णस्य दीर्घाभावादृर्णस्यान्तरतमोदीर्घ ॠकारो भविष्यति।(*प्रदीपः, व्याकरणमहाभाष्यम्,* अ. १/१/९)।

[10] *वार्तिकम्, काशिका,* अ. १/१/९।

[11] यद्यविधेय सवर्णसंज्ञां तदुच्यते, अग्मात्रस्य ऌति तत् कार्यं स्यात् दध्यॢकार इति। तस्माद्विधेया सवर्णसंज्ञा।( *प्रदीपः, व्याकरणमहाभाष्यम्,* अ. १/१/९)।

[12] *पदमञ्जरी, काशिका,* अ.१/१/९।

[13] *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.१/१/९।

[14] ऋकारस्य ऋकार एव इति ऋत्येव भवष्यति। ततः 'ऌति'। ऋत इत्येव। इदं चासवर्णार्थम्। तेन ऌति रूपद्वयं सिद्धम्।( *प्रदीपः, व्याकरणमहाभाष्यम्,* अ. १/१/९)।

[15] *पदमञ्जरी, काशिका,* अ.१/१/९।

[16] *वार्तिकम्, महाभाष्यम्,* अ.१/१/९।

[17] *महाभाष्यम्,* अ.१/१/९।

[18] *प्रदीपः, व्याकरणमहाभाष्यम्,* अ.१/१/९।

[19] *पदमञ्जरी, काशिका,* अ.१/१/९।

[20] *वैयाकरणसिद्धान्तकौमुदी,* अ.६/१/१०१।

*वा वचनम्, लृति ल्लृ वा वचनम्"*[21] इति वार्तिकद्वयम् अवश्यं विधेयम्।

परन्तु विधीयमान ऋकारऌकारयोरीषद्स्पष्टप्रयत्नम्। तर्हि अच् प्रत्याहारस्थ ऋकारऌकाराभ्यां भिन्नमन्यवर्णौ, अतः सवर्णसंज्ञापि न भवति। अच्प्रत्याहारस्थितो वर्णस्य प्लुतसंज्ञा विधेया, न तु अच्भिन्नस्य। अतः ऋकारऌकारयो प्लुतसंज्ञा विधानार्थमच्त्वमवश्यं कर्तव्यम्[22]। यथा- होतृ + ऋकारः = होतॄकारः, 'होतृ३कारः। होतृ + ऌकारः = होत्लृकारः,होत्लृ३कार इति। प्रदीपकारेण उक्तं यत्-*"त्वयापि 'ऋ(ॠ)वा वचनं ऌ(ल्लृ)वा वचनम्' इति ब्रवाऽच्त्वमनयोर्वक्तव्यम्। अन्यथा विधानमात्रमनयोः स्यात्। नाऽच्कार्यं प्लुतः। सति त्वच्त्वेताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भविष्यतीति प्लुतसिद्धिः।"* [23] एवमप्युक्तं पदमञ्जरीकारेण- *"ऋति ऋ(ॠ)वा वचनम्, ऌति ऌ(ल्लृ)वा वचनमिति ब्रवतापि त्वयोरच्त्वं वक्तव्यम्; अन्यथा विधानमात्रमनयोः स्यात्। न त्वच्कार्यः प्लुतः। सति त्वच्त्वेताभ्यां त्रिमात्रयोरपि सावर्ण्याद्ग्रहणे सति प्लुतसंज्ञा भवतीति प्लुतसिद्धिः"*।[24]

होतृ + ऋकार इति स्थिते 'अकः सवर्णे दीर्घः'(६/१/१०१) इत्यनेन पूर्वपरयोः सवर्णे दीर्घे ॠकारे 'होतॄकारः' इति रूपं सिध्यति। परन्तु प्राचां व्याख्यातम्- *"ऋति सवर्णे ऋ वा"*[25] इत्यनेन वार्तिकेन वैकल्पिके पूर्वपरयोः ह्रस्वे ऋकारे 'होतृकारः' इति रूपं सिध्यति । होतृ + ऌकार इति स्थिते *"लृति सवर्णे ऌ वा"*[26] इत्यनेन वार्तिकेन वैकल्पिके पूर्वपरयोः ह्रस्वे ऌकारे 'होत्लृकारः' इति रूपं सिध्यति। प्रौढमनोरमाकारस्य मते प्राचाम् एतादृशा व्याख्या भाष्यकैयटादिविरोधादुपेक्ष्यम्[27] । कारणं *"तुल्यास्य प्रयत्नं सवर्णम्"* (अ.१/१/९) सूत्रे भाष्ये रेफद्वयलकारद्वयघटितस्यास्य वर्णद्वयस्य होतृकार इत्यादौ प्लुतसिद्धर्थे प्रतिज्ञाताच्त्ववत् दीर्घत्वमपि प्रतिज्ञाय *'अकः सवर्णे दीर्घः'* (६/१/१०१) इति सूत्रेणैव कदाचिद्रेफद्वयवत्तारूपान्तरतम्यादृकारद्वयस्थाने रेफद्वयघटितस्य, लकारवत्तारूपान्तरतम्याच्च ऋकारऌकारयोः स्थाने लकारद्वयघटितस्य, एवमुयत्रापि कदाचित् विवृतत्वसाम्येन विवृतर्कारस्य सिद्धिमाश्रित्येदं वार्तिकं प्रत्याख्यातम्। एतेन प्रमाणितम्- *"तत्र हि अकः सवर्णे दीर्घः(६/१/१०१) इति सूत्रेणैतद्वार्तिकान्यथासिद्धिरुद्भाविता।"*[28] अतः *"दीर्घे प्राप्ते ह्रस्व ऋकारः, ऌकारश्च विधीयत इति"*[29]मतं भाष्यविरुद्धमुपेक्षनीयम्। अतः ऋ(ॠ), ऌ(ल्लृ) इति वर्णद्वयमच्प्रत्याहारे पाठं कृत्वा *"ऋकारऌवर्णयोः सवर्णविधिः"*[30] इति वार्तिकानुसारेण सवर्णसंज्ञा, *"ऋति सवर्णे ऋ(ॠ) वा, लृति सवर्णे ऌ(ल्लृ) वा"*[31] इत्येनन वार्तिकेन दीर्घविधिरपेक्षा अधिकसमीचीना। सवर्णसंज्ञया दीर्घत्वं चैव सिद्धं भवति, अपि च ऋकारग्रहणेन ऌकारग्रहणं सन्निहितं भवति। यथा- 'खट्वा + ऋर्ष्यः', 'माला + ऋर्ष्यः' इति स्थिते "ऋत्यकः"(अ.६/१/१२८) इत्यनेन वैकल्पिके ह्रस्वे अकारे प्रकृतिभावे च 'खट्वऋर्ष्यः', 'मालऋर्ष्यः' इत्येकं रूपं भवति। यदा ऋकारऌकारयोः सवर्णसंज्ञा विधेया, तदा 'खट्वा + ऌर्ष्यः', 'माला + ऌर्ष्यः' इति स्थिते "ऋत्यकः"(अ.६/१/१२८) इत्यनेन वैकल्पिके ह्रस्वे अकारे प्रकृतिभावे च 'खट्वऌर्ष्यः', 'मालऌर्ष्यः' इत्येकं रूपमपि भवति।

अपि च उप + ऋषभीयतीत्यत्र *"वृद्धिरादैच्"*(अ.२/१/१) इति सूत्रानुसारेण *"वा सुप्यापिशलेः"*(६/१/९२) इत्यनेन वैकल्पिके पूर्वपरयोर्वृद्ध्येकादेशे आकारे *"उरण्रपरः"*(१/१/५१) इत्यनेन रपरत्वे उपार्षभीयतीति रूपं सिध्यति। वृद्ध्यभावपक्षे तु उप + ऋषभीयति = उपर्षभीयतीति रूपं सिद्धम्। ऋकारेण सवर्णऌकारस्य ग्रहणे उप + ऌकारीयतीति स्थिते वृद्धिरेकादेशे आकारे उपाल्कारीयति सिध्यति। वृद्ध्यभावपक्षे तु उप + ऌकारीयति = उपल्कारीयति रूपं सिद्धम्।

यदा ऋकारऌकारयोः सवर्णसंज्ञा सिध्यति। तदा ऋकारग्रहणेन ऌकारग्रहणं सन्निहितं भवति। अत ऋकारस्य गुणोऽकारः 'उरण्रपरः'(अ.१/१/५१) इत्यनेन रपरत्वं भवति। ऌकारस्य गुणोऽकारः 'उरण्रपरः'(अ.१/१/५१) इत्यनेन रपरत्वम् आपत्तिर्भवति। समाधाने भाष्यकारेण उक्तम्- "ऌकारस्य लपरत्वं वक्ष्यामि।"[32] अर्थात् ऌकारस्य गुणोऽकारः 'उरण्रपरः'(१/१/५१) इत्यनेन लपरत्वं कर्तव्यम्। 'रपरः' इत्यत्र 'र' इति प्रत्याहारो विवक्षितः। 'हयवरट्' इत्यतः रकारं नीत्वा 'लण्' सूत्रे इत्संज्ञकेन अकारेण सह 'र' इति प्रत्याहारो भवति। अतः 'र' प्रत्याहारे र्,ल्

---

21 *वार्तिकम्, महाभाष्यम्,* अ.१/१/९।

22 तच्चावश्यं वक्तव्यम्, प्लुतो यथा स्यात्। होतृ ऋकारः- होतॄकारः, होतृ३कारः । होतृ ऌकारः- होत्लृकारः,होत्लृ३कार इति।(*व्याकरणमहाभाष्यम्,* अ. १/१/९)।

23 *पदमञ्जरी, काशिका,* अ.१/१/९।

24 *पदमञ्जरी, काशिका,* अ.१/१/९।

25 *वार्तिकम्, वैयाकरणसिद्धान्तकौमुदी,* अ.६/१/१०१।

26 तदेव।

27 यत्तु प्राचां व्याख्याताम्- दीर्घे प्राप्ते ह्रस्व ऋकारः ऌकारश्च विधीयत इति तद्भाष्यकैयटादि विरोधादुपेक्ष्यम्।(*प्रौढमनोरमा,* अ.१६/१/१०१)।

28 *शब्दरत्नम्,* अ.६/१/१०१)।

29 *प्रौढमनोरमा,* अ.६/१/१०१।

30 *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.१/१/९।

31 तदेव।

32 *व्याकरणमहाभाष्यम्,* अ.१/१/९।

इत्यनयोर्ग्रहणीयम्। अतः ऋकारस्थाने रपरः, ऌकारस्थाने लपरः सिध्यति। तर्हि अवश्यमेव लपरत्वं वक्तव्यम्। भाष्यकारेण उक्तम्- "असत्यां सवर्णसंज्ञायां विध्यर्थम्, तदेव सत्यां रेफबाधनार्थं भविष्यति।"[33]

*"रषाभ्यां नो णः समानपदे"*(अ.८/४/१) इत्यस्मिन् सूत्रे पठितः *"रषाभ्यां णत्वे ऋकारग्रणम्,"*[34] अनेन वार्तिकेन नकारस्य णः प्राप्तः,यथा- पितृणां, मातृणाम् इति। अतः यदि णत्वविधौ ऋकारेण ऌकारग्रहणं भवति, तर्हि 'कॢप्यमानं पश्य' इत्यस्मिन् उदारणे *"अट्कुप्वाङ्नुम्व्यवायेऽपि"* (अ.८/४/२) इत्यनेन नकारस्य णत्वे आपत्तिर्भवति। अत ऋकारऌकारयोः सवर्णसंज्ञा स्वीकृत्वा ऋवर्णेन ऌवर्णग्रहणं कृतम्, तर्हि दोषो भवति। तथासत्यमपि सवर्णसंज्ञायां 'कॢप्यमानं पश्य' इत्यस्मिन् उदाहरणे *"कृत्यचः"*(अ.८/४/२८) इत्यनेन नकारस्य णत्वं कथं न भवति? भाष्यकारेण उक्तम्- *"चुटुतुलशर्व्यवायेने'ति वक्ष्यामि। अपर आह- त्रिभिश्च मध्यमैवर्गैर्लशसैश्च व्यवाये नेति वक्ष्यामीति* ।"[35] अर्थात् चवर्गः टवर्गः तवर्गः लकारः शर् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि नस्य णः नेति भवति। 'वर्णैकदेशाश्च वर्णग्रहणेन गृह्यन्ते' इत्यस्मिन् पक्षे ऌवर्णे आर्धमात्रा व्यञ्जन् लकारस्तदाश्रयः प्रतिषेधो भविष्यति। अतो यदि वर्णैकदेशाश्च वर्णग्रहणेन ग्रह्यन्ते, तर्हि योऽसौ ऋकारे रेफस्तदाश्रयं पितृणां, मातृणाम् अत्र "रषाभ्यां नो णः समानपदे"(अ.८/४/१) इत्यनेन नकारस्य णत्वं भवति। अतः *"रषाभ्यां णत्वे ऋकारग्रणम्* ।"[36] इति वार्तिकस्य प्रयोजनं नास्ति। यदि वर्णैकदेशाश्च वर्णग्रहणेन न गृह्यन्ते, तर्हि पितृणां, मातृणाम् अत्र नकारस्य णत्वे *"रषाभ्यां णत्वे ऋकारग्रणम्"*[37] इति वार्तिकमावश्यकम्। अस्मिन् पक्षे यदि ऋकारऌकारयोः सवर्ण संज्ञा गृह्यन्ते तर्हि 'कॢप्यमानं पश्य' अत्र नकारस्य णत्वं प्राप्तम्। परन्तु *"क्षुभ्नादिषु च"*(८/४/३९) इत्यनेन नकारस्य णत्वप्रतिषेधो भविष्यति। अत ऋकारऌकारयोः सवर्णसंज्ञा स्वीकारे दोषो न भवति।

परन्तु *"तपरस्तत्कालस्य"*(१/१/७०) इत्यनेन 'ऋत्' इति षण्णां संज्ञा। यदा ऋकारेण ऌकारग्रहणं सन्निहितं भवति तदा ऋदित्यनेन ऌदित्यपि द्वादशानां ग्रहणं स्यात्। तर्हि सर्वदा ऋदित् ग्रहणं करणीयम्। पृथक् ऌदित् ग्रहणं व्यर्थम्। 'प्रथमातिक्रमणे कारणाभावात्' इत्यनेन न्यायेन प्रथमातिक्रमणे द्वितीयातृतीयाग्रहणं न युक्तियुक्तम्[38]। वर्णसमाम्नायेऽपि आदौ ऋकारस्य पाठः, अतः सर्वत्र ऋदित्(ऋत्) इत्यनेन ह्रस्व ऋकार ऌकारश्च द्वादशानां वर्णानां ग्रहणेन कार्यसिद्धिर्भवति। तथापि पाणिनिमुनिना *"पुषादिद्युताद्यॢदितः परस्मैपदेषु"*(३/१/५५) इति सूत्रे पृथक् ऌदित्ग्रहणं कृतम्। *"ऋतो ङि सर्वनामस्थानयोः"*(७/३/११०) इति सूत्रे 'ऋत्' ग्रहणं कृतम्। अतः 'ऋत्', 'ऌत्' पृथक् ग्रहणं कृतम्, एतेन ज्ञापितं ऌदित्यनेन ऋप्रपञ्चस्य ग्रहणं न भवति[39]। इदमेवाभिप्रेत्य *"अनुदित्सवर्णस्य चाप्रत्ययः"*(१/१/६९)इति ग्रहणकसूत्रे 'ऋत्' इत्यनेन ऌप्रपञ्चस्य ग्रहणम्, परन्तु 'ऌत्' इत्यनेन ऋप्रपञ्चस्य ग्रहणं न भवति[40] ।अपि च सर्वत्र ऋकारोऽनुबन्धविशिष्टकार्यं 'ऌदित्' धातोर्णिजन्तलुङ्लकारे *"णौ चङ्युपधाया ह्रस्वः"*(७/४/१) इत्यनेन उपधायां ह्रस्वप्राप्ते *"नाग्लोपिशास्वृदिताम्"*(७/४/२) इत्यनेन निषेधो भवति। अतः 'अवबाधत्' 'अययाचत्' इति रूपद्वयं सम्भवति। परन्तु 'आप्ऌ' इति 'ऌदित्' आप्- धातोर्णिजन्तलुङ्लकारे उपधाह्रस्वस्य निषेधो भवति। तर्हि 'अपिपत्' इति रूपस्य आपत्तिर्भवति। ऌकारोऽनुबन्धविशिष्टकार्यं 'ऋदित्' स्थलेऽपि प्रवृत्तिर्न भवति। यथा- गम्ऌ, आप्ऌ इत्यनयोः 'ऌदित्' धातौ, अत्र लुङ्लकारे *"पुषादिद्युताद्यॢदितः परस्मैपदेषु"*(३/१/५५) इत्यनेन 'च्लि' स्थाने 'अङ्' आदेशे अगमत्, आपत् रूपद्वयं सिद्धम्। 'ऋदित्' स्थलेऽपि 'ऌदित्' कार्यस्य आपत्तिर्भवति। यथा -'खादृ' धातोर्स्थले लुङ्लकारे *"पुषादिद्युताद्यॢदितः परस्मैपदेषु"*(३/१/५५) इत्यनेन 'च्लि' स्थाने 'अङ्' आदेशे 'अखादीत्' इति रूपं न सिद्ध्यति। अपि च "गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्"(अ.८/२/८६) इत्यनेन 'कॢ३प्तशिखः' इत्यत्र प्लुतो भवति, यदा ऋकारऌकारयोः सवर्णसंज्ञा कृता तदा 'कॢ३प्तशिखः' इत्यत्र 'अनृतः' इति निषेधात् प्लुतसंज्ञा न भवति। एतेन प्रमाणितं सर्वत्र ऋदित् अनुबन्धविशिष्टकार्यं ऌदित् स्थले,ऌदित् अनुबन्धविशिष्टकार्यं ऋदित् स्थले प्रवृत्तिर्न भवति। एतस्मिन् कारणे पाणिनिमुनिना सूत्रे ऋदित्, ऌदित् च पृथक् रूपे पाठं कृतम्।

यदि ऋकारग्रहणेन ऌकारग्रहणं सर्वत्र सन्निहितं भवति, तर्हि माहेश्वरसूत्रे पृथक् ऌकारग्रहणं व्यर्थम्। परन्तु पृथक्

---

33 तदेव

34 *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.८/४/१।

35 *व्याकरणमहाभाष्यम्,* अ.१/१/९।

36 *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.८/४/१।

37 तदेव।

38 अन्यथा ऋतो ङीत्यादौ क्वचिद् ऋद्ग्रहणस्य पुषादिद्युताद्यॢदित इत्यादौ क्वचिद् ऌदिद्ग्रहणमस्य च वैयर्थ्यापत्तेः; प्रथमातिक्रमणे कारणाभावेणन सर्वत्र ऋदिद्ग्रहणास्यैव कर्तुं शक्यत्वात्।(*बालमनोरमा,* अ.१/१/७०)

39 तथा च 'पुषादिद्युताद्यॢदितः' इत्यादिविधय ऋदित्स्वपि प्रवर्तेरन्निति चेन्न, ऋदित्यनेन ऌप्रपञ्चस्य ग्रहणेऽपि क्वचित् ऌदिद्ग्रहणबलेन ऌ इत्यनेन ऋप्रपञ्चस्य ग्रहणाभावात्।(*बालमनोरमा,*अ.(१/१/७०)।

40 इदमेवाभप्रेत्य ग्रहणकसूत्रे ऋदिति द्वादशानामित्येवोक्तं, नतु ऌदपीति।(*बालमनोरमा,* अ.(१/१/७०)।

ऌकारग्रहणेन ज्ञापितम् *"ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या"*[41] इति वार्तिकानुसारे ऋकारऌकारयोः सवर्णसंज्ञा विहितोऽपि एषा सावर्णविधिरनित्यं स्यात्।

**परिशीलिता ग्रन्थाः**


१. पाणिनिः, *अष्टाध्यायी* (प्रथमो द्वितीयो भागश्च), सम्पादकः ईश्वरचन्द्रः, दिल्ली : चौखम्बा संस्कृत प्रतिष्टान, पुनर्मुद्रिसंस्करणम् २०१७।

२. पतञ्जलिः, *व्याकरणमहाभाष्यम्* (प्रथमो नवाह्निकम्),सम्पादकः चारुदेव शास्त्री, दिल्ली : मोतीलाल बनारसीदास, प्रथमसंस्करणं संवत् २०२५।

३. पतञ्जलिः, *व्याकरणमहाभाष्यम्* (नवाह्निकम्), सम्पादकः हरिनाराणतिवारी, वारणसी : चौखम्बा विद्याभवन, पुनर्मुद्रितसंस्करणम् २०१४।

४. पतञ्जलिः, *व्याकरणमहाभाष्यम्* (*भाष्यप्रदीपोद्योत*समुल्लसितम्), प्रथमो भागः, सम्पादकः भार्गव शास्त्री जोशी दिल्ली : चौखम्बा संस्कृत प्रतिष्टान, पुनर्मुद्रितसंस्करणम् २०१४।

५. पतञ्जलिः, *व्याकरणमहाभाष्यम्* (*भाष्यप्रदीपोद्योत* समुल्लसितम्), षष्ठं खण्डम्, सम्पादकः दधिरामशर्मणम दिल्ली : चौखम्बा संस्कृत प्रतिष्टान, पुनर्मुद्रितसंस्करणम् २०१४।

६. वामनजयादितः, *काशिका* (*न्यासपदमञ्जरीभाबोधिनी*सहिता),प्रथमो भागः, सम्पादकौ जयशङ्करलालत्रपाठी सुधारमालवीयश्च, वाराणसी : तारा बुक एजेन्सी, पुनर्मुद्रणम् २०१६।

७. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (*बालमनोरमातत्त्वबोधिनी* सहिता), प्रथमो भागः, सम्पादकौ गिरिधरशर्मा परमेश्वरानन्दशर्मा च, दिल्ली : मोतीलाल बनारसीदास, पुनर्मुद्रणम् २०१०।

८. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (*बालमनोरमा* सहिता), प्रथमो भागः, सम्पादकः गोपालदत्त पाण्डेयः, वाराणसी : चौखम्बा सुरभारती प्रकाशन, संस्करणम् २०१७।

९. भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः), सम्पादकः व्याखाकारः गोविन्दाचार्यः सम्पदिका लक्ष्मीशर्मा च, वाराणसी : चौखम्बा सुरभारती प्रकाशन, संस्करणम् २०१७।

१०. भट्टोजिदीक्षितः, *पौढमनोरमा* (*सशब्दरत्न-भैरवी 'आयुषी'* हिन्दीव्याख्या विभूषिता), पञ्चसन्धिप्रकरान्तो प्रथमो भागः, सम्पादकः रमाकान्तपाण्डेयः, वारणसी : चौखम्बा विद्याभवन, प्रथमसंस्करणम् २०१२।


[41] *वार्तिकम्, व्याकरणमहाभाष्यम्,* अ.८/४/१।